"संवाध्यमानो हृदि नाभिदेशे
गात्रेषु वा पाकरुजायुतेषु ।
पीड़ाज्वरार्त्तोऽङ्गुलिभिश्च गच्छेत्
स धातुपाको कथितो भिषग्भिः ॥"

अपरञ्च ।
"नाभेरूर्द्ध्वं हृदोऽधस्तात् पीद्यते व्यथया यदि
धातोः पाकं विजानीयादन्यथा तु मलस्य च ॥"
मलपाकलक्षणमाह ।
"दोषप्रकृतिवैकृत्यं लघुता ज्वरदेहयोः ।
इन्द्रियाणाञ्च वैमल्यं मलानां पाकलक्षणम् ॥"
दोषप्रकृतिवैकृत्यं दोषा वातादयस्तेषां प्रकृतिर्वेपथुदाहगौरवादिकरणं तस्य वैकृत्यं वैपरीत्यम् । वैमल्यं मलराहित्यम् । मलानां दोषाणाम् । अन्यच्च ।
"शब्दोन्द्रियपञ्चकस्य पटुता वह्नेश्च यत्र क्रमात्
तृष्णादिप्रशमो ज्वरस्य मृदुता तं दोषपाकं वदेत् ।
हृन्नाभ्योरतिवेदनातिसरणं तीव्रो ज्वरस्तृण्मद
श्वासाधिक्यमरोचको रतिरिति स्याद्धातुपाकाकृतिः ॥" * ॥
आमस्याधिक्येन सप्तमदिवसाद्यत्रव्यतिक्रमे परमावधिमाह । हारीतः ।
"सप्तमी द्विगुणा यावन्नवम्येकादशी तथा ।
एषा त्रिदोषमर्य्यादा मोक्षाय च वधाय च ॥"
नवम्येकादशी चागमनदिवसं संविहाय बोद्धव्या तेनागमनदिवसं नीत्वा दशमी द्वादशी च अत्र रात्रिरित्यध्याह्रियते ।
"सन्निपातज्वरी पूर्वं सम्यग्लङ्घनमाचरेत् ।
शृतं शीतं पिबेदम्भः समये भेषजं भवेत् ॥
सन्निपातेन तृष्यन्तं पार्श्वरुक् तालुशोषितम् ।
यः पाययेज्जलं शीतं स मृत्युर्नरविग्रहः ॥"
शीतं अक्वथितम् । शृतं तु शीतं विहितमेव इति लङ्घनम् ॥ * ॥ अथ वालुकास्वेदः ।
"वातश्लेष्मकृते स्वेदात् कारयेद्रूक्षनिर्म्मितात्
स्निग्धः स्वेदो निषिद्धोऽत्र विना केवलवातजान्
खर्परभृष्टपटस्थितकाञ्जिकसंसिक्तवालुकास्वेदः
शमयति वातकफामयमस्तकशूलाङ्गभङ्गादीन् ॥
स्रोतसामार्द्रवं कृत्वा नीत्वा पावकमाशयम् ।
हत्वा वातकफस्तम्भं स्वेदो ज्वरमपोहति ॥"
इति वालुकास्वेदः ॥ * ॥

अथ नस्यम् ।
"सैन्धवं श्वेतमरिचं सर्षपाः कुष्ठमेव च ।
वस्तमूत्रेण संपिष्टं नस्यं तन्द्रानिवारणम् ॥"
श्वेतमरिचं शिग्रुबीजम् । सैन्धवादिनस्यम् ॥
"मधूकसारसिन्धूत्थवचोषणकणाः समाः ।
श्लक्ष्णं पिष्ट्वाम्भसा नस्यं दद्यात् संज्ञाप्रबोधनम् ॥"
इति मधूकसारादिनस्यम् ॥
"मातुलुङ्गार्द्रकरसं कोष्णं त्रिलवणान्वितम् ।
अन्यद्वा सिद्धविहितं नस्यं तीक्ष्णं प्रयोजयेत् ॥
तेन प्रभिद्यते श्लेष्मा प्रभिन्नश्च प्रसिच्यते ।
शिरोहृदयकण्ठास्यपार्श्वरुक् चोपशाम्यति ॥
मोहामयेन मुग्धं बोधयितुं यादृशः शक्तः ।
कल्पतरुनामधेयो रसो न तादृक् परं किञ्चित् ॥"
इति नस्यम् ॥ * ॥

अथ निष्ठीवनम् ।
"जिह्वातालुगलक्लोम मरुत्पित्तेन चोच्छ्रितः ।
तदा स चारयेच्छोषं जिह्वायाः खरतां तथा ॥
स्फुटनञ्च तदा जिह्वां लेपयेन्मधुपिष्टया ।
द्राक्षया साज्यपातेन जिह्वा स्यात् सरसा मृदुः ॥
आर्द्रकस्य रसोपेतं सैन्धवं कटुकत्रयम् ।
आकण्ठाद्धारयेदास्ये निष्ठीवेच्च पुनः पुनः ॥
तेनास्य हृदयक्लोममन्यापार्श्वशिरोगलात् ।
लीलोऽप्याकृष्यते श्लेष्मा लाघवं चास्य जायते ॥
पर्व्वभेदो ज्वरो मूर्च्छा निद्राश्वासगलामयाः ।
मुखाक्षिगौरवं जाड्यमुत्क्लेशश्चोपशाम्यति ॥
सकृत् द्विस्त्रिश्चतुः कुर्य्याद्दृष्ट्वा दोषबलाबलम् ।
एतद्धि परमं प्राहुर्भेषजं सान्निपातिनाम् ॥"
इति कवलग्रहः ॥ * ॥

अथावलेहः ।
"कट्फलं पौष्करं शृङ्गी व्योषं यासश्च कारवी
श्लक्ष्णचूर्णीकृतं चैतत् मधुना सह लेहयेत् ॥
एषावलेहिका हन्ति सन्निपातं सुदारुणम् ।
हिक्कां श्वासञ्च कासञ्च कण्ठरोगञ्च नाशयेत् ।
एतद्द्वयोज्यं कफोद्रेके चूर्णमार्द्रकजै रसैः ॥"
तन्त्रान्तरे च उक्तम् ।
"अष्टाङ्गं मधुना लिह्यादार्द्रकस्य रसेन वा ।
संमोहं दारुणं हन्यात्तन्द्राकाससमन्वितम् ॥"
इति ।
"सर्वेषु सन्निपातेषु न क्षौद्रमवचारयेत् ।
शीतोपचारि क्षौद्रं स्याच्छीतञ्चात्र विरुध्यते ॥
अयमभिप्रायः । सन्निपातज्वरेषु श्लेष्मनिग्रहार्थं सर्व्वदा स्वेदो हित उक्तः । अत्राग्निसम्बन्धाद्देहस्योष्णता तिष्ठेदेव । उष्णेन मधुना विरोधः । उक्तञ्च सुश्रुतेन ।
"उष्णैर्विरुध्यते सर्वं विषान्वयतया मधु ।
उष्णार्त्तमुष्णैरुष्णञ्च तन्निहन्ति यथा विषम् ॥"
इति ॥
शीतोपचारि क्षौद्रमिति । शीतेनोपचारोऽस्यास्तीति शीतोपचारि । शीतञ्चात्र सन्निपाते विरुध्यते । अयमवलेहः प्रायेणोर्द्ध्वजत्रुजरोगहरत्वात् सायमुपयुज्यते । यत उक्तं चरकेण ।
"ऊर्द्ध्वं जत्रुगदघ्नी या सा सायमवलेहिका ।
अधोरोगहरी या सा भोजनात् प्राक् प्रयुज्यते ॥"
पौष्करं पुष्करमूलं तदलाभे कुष्ठं देयम् । शृङ्गी कर्कटशृङ्गी । व्योषं शुण्ठीपिप्पलीमरिचानि । यासो यवासः । केचिद्यासस्थाने यवानीं प्रक्षिपन्ति । कारवी मगरैला इति लोके । अष्टाङ्गावलेहिका ॥ * ॥
"स्विन्नमामलकं पिष्ट्वा द्राक्षया सह मेलयेत् ।
विश्वभेषजसंयुक्तं मधुना सह लेहयेत् ।
तेनाशु शाम्यति श्वासः कासो मूर्च्छारुचिस्तथा ॥"
इत्यवलेहः ॥ * ॥

अथाञ्जनम् ।
"शिरीषबीजगोमूत्रकृष्णामरिचसैन्धवैः ।
अञ्जनं स्यात् प्रबोधाय सरसोनशिलावचैः ॥"
इति शिरीषबीजाद्यञ्जनम् ॥ * ॥
"अयोरजः श्वेतलोध्रमञ्जनं मरिचं तथा ।
गोपित्तेन समायुक्तं तन्द्रानाशनमुत्तमम् ॥"
गोपित्तं गोरोचना । लौहचूर्णाद्यञ्जनम् ॥ * ॥
"अञ्जनं सम्यगारब्धं मधुसिन्धुशिलोषणैः ।
प्रमोहद्रोहि भवति भाषितं भिषजां वरैः ॥"
शिला मनःशिला । उषणं मरिचम् । इत्यञ्जनम् ॥ * ॥ अथ क्वाथः ।
"सूतं विषञ्च मरिचं तुत्थकं नवसादरम् ।
चूर्णितं स्वरसैर्म्मर्द्यं धूर्त्तपत्ररसोनयोः ॥
सन्निपातकृते मोहे मूर्द्ध्नि लिम्पेत् पदोपरि ।
अस्थिव्यथास्वनेनैव लेपं कुर्य्यात् पदोपरि ॥"
पदं पौछ इति लोके ।
"विल्वश्योनाकगम्भारीपाटलागणिकारिकाः ।
पाचनं वातकफहृत् पञ्चमूलमिदं महत् ॥
शालपर्णी पृश्निपर्णी वृहती कण्टकारिका ।
गोक्षुरो वातपित्तघ्नं कनीयः पञ्चमूलकम् ॥
उभयं दशमूलं तत् पिप्पलीचूर्णसंयुतम् ।
सन्निपातज्वरं हन्ति हृत्कण्ठग्रहनाशनम् ॥
तन्द्रावातकफातङ्कश्वासपार्श्वार्त्तिकासनुत् ।
महान्ति यानि मूलानि काष्ठगर्भाणि यानि च ।
तेषान्तु वल्कलं ग्राह्यं ह्रस्वमूलानि कृत्स्नशः ॥"
अत्र विल्वादीनां पञ्चानां मूलस्य वल्कलं ग्राह्यम् । दशमूलक्वाथः ॥ * ॥
"दशमूलीकषायस्तु स पौष्करकणान्वितः ।
सन्निपातज्वरे देयः श्वासकाससमन्विते ॥"
इति द्वादशाङ्गक्वाथः ॥ * ॥
"चिरज्वरे वातकफोल्वणे वा
त्रिदोषजे वा दशमूलमिश्रः ।
किराततिक्तादिगणः प्रयोज्यः
शुद्ध्यर्थिने वा त्रिवृता विमिश्रः ॥"
किराततिक्तादिर्यथा,—
किराततिक्तको मुस्तं गुड़ूची विश्वभेषजम् ।
किराताादिगणो ह्येष चातुर्भद्रकमित्यपि ॥"
इति चतुर्द्दशाङ्गक्वाथः ॥ * ॥
"दशमूली शठी शृङ्गी पौष्करं सदुरालभम् ।
भार्गी कुटजबीजञ्च पटोलं कटुरोहिणी ॥
अष्टादशाङ्ग इत्येष सन्निपातज्वरापहः ।
कासहृद्ग्रहपार्श्वार्त्तिश्वासहिक्कावमीहरः ॥"
इत्यष्टादशाङ्गक्वाथः ॥ * ॥
"भूनिम्बदारुदशमूलमहौषधाब्द-
तिक्तेन्द्रबीजधनिकेभकणाकषायः ।
तन्द्राप्रलापकसनारुचिदाहमोह-
श्वासत्रिदोषजनितज्वरनाशनः स्यात् ॥"
इति द्वितीयोऽष्टादशाङ्गक्वाथः ॥